व्यवते पण्डितो जनं व्रतमुपदिशतीत्यर्थः । व्यवते पुत्रं विप्रः उपनयतीत्यर्थः । इति दुर्गादासः ॥

ज्योतिः, [स्] क्ली, (द्युत दीप्तौ + इसिः । यद्वा, द्युत दीप्तौ + "द्युतेरिसिन्नादेश्च जः ।" उणां । २ । १११ । इति इसिन् दस्य च जः ।) दृष्टिः । नक्षत्रम् । (यथा, "ज्योतींष्यमित्रामेध्यमशस्तञ्च नाभिवीक्षेत ॥" इति चरके सूत्रस्थानेऽष्टमेऽध्याये ॥) प्रकाशः । इति मेदिनी । से, २३ ॥

ज्योतिः, [स्] पुं, (ज्योतते इति । ज्युत + कर्त्तरि इसिः । द्युत + इसिन् वा ।) अग्निः । (यथा,—

"तस्यान्तरेण नाभेस्तु ज्योतिः स्थानं ध्रुवं स्मृतम् ।
तदा धमति वातस्तु देहस्तेनास्य वर्द्धते ॥"

इति सुश्रुते शारीरस्थाने चतुर्थेऽध्याये ॥)

सूर्य्यः । इति मेदिनी । से, २८ ॥ मेथिका । इति राजनिर्घण्टः ॥ (विष्णुः । यथा, महाभारते १३।१४९।७६ ।

"खचरः खड्गः शतानन्दो नन्दिर्ज्योतिर्गणेश्वरः ॥")

ज्योतिरिङ्गः, पुं, (ज्योतिषा इङ्गतीति । इगि गतौ + अच् । ज्योतिरिव इङ्गतीति वा ।) खद्योतः । इति शब्दरत्नावली ॥

ज्योतिरिङ्गणः, पुं, (ज्योतिरिव इङ्गतीति । इगि गतौ + ल्युः ।) कीटविशेषः । ज्योनाकपोका इति भाषा । तत्पर्य्यायः । खद्योतः २ ध्वान्तोन्मेषः ३ तमोमणिः ४ दृष्टिबन्धुः ५ तमोज्योतिः ६ ज्योतिरिङ्गः ७ निमेषकः ८ । इति शब्दरत्नावली ॥ ज्योतिर्व्वीजम् ९ निमेषरुक् १० । इति त्रिकाण्डशेषः ॥

ज्योतिर्व्वीजं, क्ली, (ज्योतिर्वीजमिवास्य ज्योतिषो वीजमिव वा ।) ज्योतिरिङ्गणः । इति त्रिकाण्डशेषः ॥

ज्योतिर्हस्ता, स्त्री, (ज्योतिर्ज्योतीरूपं हस्तं शरीरमस्याः ।) दुर्गा । अस्या नामनिरुक्तिर्यथा,—

"हस्तं शरीरमित्याहुर्हस्तञ्च गगनं तथा ।
ज्योतिषि ग्रहनक्षत्राज्ज्योतिर्हस्ता ततः स्मृता ॥"

इति देवीपुराणे देवीनिरुक्तनाम ४५ अध्यायः ॥

ज्योतिश्चक्रं, क्ली, (ज्योतिर्म्मयं चक्रम् । ज्योतिर्भिः स्वस्वावस्थानेन विरचितं चक्रं वा ।) चन्द्रसूर्य्यादिग्रहनक्षत्रमण्डलम् । राशिचक्रम् । यथा,

"ज्योतिश्चक्रं भुवो मानमूर्द्ध्वं प्रोवाच केशवः ।
चातुर्लक्षं ज्योतिषस्य सारं रुद्राय सर्व्वदः ॥"

इति गरुडपुराणम् ॥

अपि च तिथ्यादितत्त्वे ।

"सप्तविंशतिभिर्ज्योतिश्चक्रं स्तिमितवायुगम् ।
तदर्कांशो भवेद्राशिर्नवर्क्षचरणाङ्कितः ॥"

ज्योतिषं, क्ली, (ज्योतिः सूर्य्यादीनां ग्रहाणां गत्यादिकं प्रतिपाद्यतया अस्त्यस्येति अच् ।) वेदाङ्गशास्त्रविशेषः । तत् ग्रहयागादिगणनशास्त्रम् । इत्यमरटीकायां भरतः ॥

"पञ्चस्कन्धमिदं शास्त्रं होरागणितसंहिता ।
केरलिः शकुनश्चैव——————॥"

इति प्रश्नरत्नटीका ॥*॥

अस्य सम्बन्धादि यथा,—

"अस्य शास्त्रस्य सम्बन्धो वेदाङ्गमिति चोदितः ।
अभिधेयञ्च जगतां शुभाशुभनिरूपणम् ॥
इज्याध्ययनसंक्रान्तिग्रहषोडशकर्म्मणाम् ।
प्रयोजनञ्च विज्ञेयं तत्तत्कालविनिर्णयः ॥"

इति नारदीयम् ॥ * ॥

अस्याध्ययनं द्विजैः कर्त्तव्यम् । यथा,—

"सिद्धान्तसंहिताहोरारूपस्कन्धत्रयात्मकम् ।
वेदस्य निर्म्मलं चक्षुर्ज्योतिःशास्त्रमकल्मषम् ॥
विनैतदखिलं श्रौतं स्मार्त्तं कर्म्म न सिध्यति ।
तस्माज्जगद्धितायेदं ब्रह्मणा निर्म्मितं पुरा ॥
अतएव द्विजैरेतदध्येतव्यं प्रयत्नतः ॥"

इति नारदः ॥ * ॥

शूद्रस्य पाठनिषेधो यथा,—

"स्नेहाल्लोभाच्च मोहाच्च यो विप्रोऽज्ञानतोऽपि वा ।
शूद्रायासुपदेशन्तु दद्यात् स नरकं व्रजेत् ॥"

इति गर्गः ॥ * ॥

अस्य ज्ञानमावश्यकं यथा,—

"वेदा हि यज्ञार्थमभिप्रवृत्ताः
कालानुपूर्व्व्या विहिताश्च यज्ञाः ।
तस्मादिदं कालविधानशास्त्रं
यो ज्योतिषं वेद स वेद यज्ञान् ॥
यथा शिखा मयूराणां नागानां मणयो यथा ।
तद्वद्वेदाङ्गशास्त्राणां गणितं मूर्द्धि संस्थितम् ॥"

इति वेदाङ्गज्योतिषम् ॥ * ॥

अस्याध्ययनफलं यथा,—

"एवंविधस्य श्रुतिनेत्रशास्त्र-
स्वरूपभर्त्तुः खलु दर्शनं वै ।
निहन्त्यशेषं कलुषं जनानां
षड्ब्दजं धर्म्मसुखास्पदं स्यात् ॥"

इति माण्डव्यः ॥ * ॥

अस्य ज्ञाने फलं यथा,—

"ज्योतिश्चक्रे तु लोकस्य सर्व्वस्योक्तं शुभाशुभम् ।
ज्योतिर्ज्ञानन्तु यो वेद स याति परमां गतिम् ॥"

इति गर्गः ॥

ज्योतिषिकः, पुं, (ज्योतिर्ज्योतिःशास्त्रं अधीते इति । क्रतूक्थादित्वात् ठक् संज्ञापूर्व्वस्य विधेरनित्यत्वात् न वृद्धिः ।) ज्योतिषिकः । इत्यमरटीका ॥ (यथा, मार्कण्डेये ।

"धर्म्मारण्या ज्योतिषिका गौरग्रीवा
गुडाश्मकाः ॥")

ज्योतिषी, स्त्री, (ज्योतिरस्त्यस्या इति अच् ङीप् च ।) तारा । इति हेमचन्द्रः । ज्योतिषशास्त्रज्ञे, त्रि ॥

ज्योतिष्कः, पुं, (ज्योतिरिव कायतीति । कै + कः ।) चित्रकवृक्षः । मेथिकाबीजम् । इति राजनिर्घण्टः ॥ (अस्य व्यवहारो यथा, "ज्योतिष्कफलतैलं वा क्षीरेण स्वर्जिका हिङ्गु मिश्रं पिबेत् ॥" इति चिकित्सितस्थाने चतुर्द्दशेऽध्याये सुश्रुतेनोक्तम् ॥) गणिकारिकावृक्षः । इति रत्नमाला ॥

ज्योतिष्काः, पुं, (ज्योतिर्भिः कायतीति । कै + कः ।) चन्द्रार्कग्रहनक्षत्रतारकाः । इति हेमचन्द्रः ॥ बहुवचनान्तोऽयं शब्दः ॥

ज्योतिष्का, स्त्री, (ज्योतिरिव कायतीति । कै + कः टाप् च ।) ज्योतिष्मतीलता । इत्यमरटीकायां स्वामी ॥

ज्योतिष्टोमः, पुं, (ज्योतींषि त्रिवृदादयः स्तोमा यस्य । "ज्योतिरायुषः स्तोमः ।" ८।३।८३ । इति षत्वम् ।) षोड़शर्त्विकसाध्ययज्ञविशेषः । तत्र द्वादशशतगोदक्षिणा । इति मलमासतत्त्वम् ॥ (यथा, महाभारते । ३ । २२१ । ३० ।

"बहुधा निःसृतः कायाज्ज्योतिष्टोमः क्रतुर्यथा ॥")

ज्योतिष्मती, स्त्री, (ज्योतिरस्त्यस्या इति । मतुप् उदित्वात् ङीप् च ।) लताविशेषः । मालकङ्गनी इति लताफटकरी इति नयाफटकी इति च भाषा ॥ तत्पर्य्यायः । पारावताङ्घ्रिः २ कटभी ३ पिण्या ४ । इत्यमरः । २ । ४ । १५० ॥ पारावतपदी ५ नगणा ६ स्फुटबन्धनी ७ पूतितैला ८ इङ्गुदी ९ । इति रत्नमाला ॥ स्वर्णलता १० अनलप्रभा ११ ज्योतिर्लता १२ सुपिङ्गला १३ दीप्ता १४ मेध्या १५ मतिदा १६ दुर्ज्जरा १७ सरस्वती १८ अमृता १९ । अस्याः स्वल्पाया गुणाः । अतितिक्तत्वम् । किञ्चित्कटुत्वम् । वातकफापहत्वञ्च । अस्याः स्थूलाया गुणाः । दाहप्रदत्वम् । दीपनत्वम् । मेधाप्रज्ञावृद्धिकारित्वञ्च । इति राजनिर्घण्टः ॥ तीक्ष्णत्वम् । व्रणविस्फोटनाशित्वञ्च । इति राजवल्लभः ॥ रात्रिः । इति राजनिर्घण्टः ॥ (नदीविशेषः । यथा, मात्स्ये । १२० । ६५ ।

"सरस्वती प्रभवति तस्माज्ज्योतिष्मती तु या ।
अवगाढे ह्युभयतः समुद्रौ पूर्व्वपश्चिमौ ॥"

ज्योतिर्व्विशिष्टे, त्रि । यथा, रघुः । ६ । २२ ।

"नक्षत्रताराग्रहसङ्कुलापि
ज्योतिष्मती चन्द्रमसैव रात्रिः ॥")

ज्योतीरथः, पुं, (ज्योतिरेव रथोऽस्य सर्व्वस्य ज्योतिश्चक्रस्य रथ इव वा ज्योतिःपदार्थानां सूर्य्यादीनामाधारत्वात् तथात्वमिति बोध्यम् ।) ध्रुवः । इति त्रिकाण्डशेषः ॥

ज्योत्स्ना, स्त्री, (ज्योतिरस्त्यस्यामिति । "ज्योत्स्नातमिस्रेति ।" ५ । २ । ११४ । इति निपातनात् नप्रत्यय उपधालोपश्च ।) चन्द्रज्योतिः । चाँदनी इति हिन्दी भाषा ॥ तत्पर्य्यायः । चन्द्रिका २ कौमुदी ३ । इत्यमरः । १ । ३ । १६ ॥ चान्द्री ४ कामवल्लभा ५ चान्द्रातपः ६ चन्द्रकान्ता ७ शीता ८ अमृततरङ्गिणी ९ । (यथा, महाभारते । १ । १ । ८६ ।

"पुराणपूर्णचन्द्रेण श्रुतिज्योत्स्नाः प्रकाशिताः ॥")

ज्योत्स्नायुक्तरात्रिः । इति मेदिनी । ने, ८ ॥ पटोलिका । इत्यमरटीकायां स्वामी ॥ अस्या गुणाः । त्रिदोषशमनत्वम् । इति राजनिर्घण्टः ॥ कषायत्वम् । मधुरत्वम् । दाहरक्तपित्तनाशित्वञ्च । इति राजवल्लभः ॥ श्वेतघोषा । इति